श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.28- षष्ठः सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥**

**nārāyaṇaṃ(n) namaskṛtya, naraṃ(ñ)caiva narottamam**

**devīṃ(m) sarasvatīṃ(ṽ) vyāsaṃ(n), tato jayamudīrayet**

**नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**nāmasaṅkīrtanaṃ(ỹ) yasya, sarvapāpapraṇāśanam**

**praṇāmo duḥkhaśamanas, taṃ(n) namāmi hariṃ(m) param**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**॥ अथाष्टाविं(म्)शोऽध्यायः ॥ 28 ॥**

**Śrīmadbhāgawatamahāpurāṇam**

**Ekādaśḥ skandhaḥ**

**.. athāṣṭāviṃ(m)śo'dhyāyaḥ - 28 ..**

**श्रीभगवानुवाच**

परस्वभावकर्माणि, न प्रशं(म्)सेन्न गर्हयेत् ।

विश्वमेकात्मकं(म्) पश्यन्, प्रकृत्या पुरुषेण च ॥ 1॥

śrībhagavānuvāca

parasvabhāvakarmāṇi, na praśaṃ(m)senna garhayet .

viśvamekātmakaṃ(m) paśyan, prakṛtyā puruṣeṇa ca .. 1..

परस्वभावकर्माणि, यः(फ्) प्रशं(म्)सति निन्दति ।

स आशु भ्रश्यते स्वार्था- दसत्यभिनिवेशतः ॥ 2॥

parasvabhāvakarmāṇi, yaḥ(ph) praśaṃ(m)sati nindati .

sa āśu bhraśyate svārthā- dasatyabhiniveśataḥ .. 2..

तैजसे निद्रयाऽऽपन्ने, पिण्डस्थो नष्टचेतनः ।

मायां(म्) प्राप्नोति मृत्युं(वँ) वा, तद्वन्नानार्थदृक् पुमान् ॥ 3॥

taijase nidrayā''panne, piṇḍastho naṣṭacetanaḥ .

māyāṃ(m) prāpnoti mṛtyuṃ(v̐) vā, tadvannānārthadṛk pumān .. 3..

किं(म्) भद्रं(ङ्) किमभद्रं(वँ) वा, द्वैतस्यावस्तुनः(ख्) कियत् ।

वाचोदितं(न्) तदनृतं(म्), मनसा ध्यातमेव च ॥ 4॥

kiṃ(m) bhadraṃ(ṅ) kimabhadraṃ(v̐) vā, dvaitasyāvastunaḥ(kh) kiyat .

vāconditaṃ(n) tadanṛtaṃ(m), manasā dhyātameva ca .. 4..

छायाप्रत्याह्वयाभासा, ह्यसन्तोऽप्यर्थकारिणः ।

एवं(न्) देहादयो भावा, यच्छन्त्यामृत्युतो भयम् ॥ 5॥

chāyāpratyāhvayābhāsā, hyasanto'pyarthakāriṇaḥ .

evaṃ(n) dehādayo bhāvā, yacchantyāmṛtyuto bhayam .. 5..

आत्मैव तदिदं(वँ) विश्वं(म्), सृज्यते सृजति प्रभुः ।

त्रायते त्राति विश्वात्मा, ह्रियते हरतीश्वरः ॥ 6॥

ātmaiva tadidaṃ(ṽ) viśvaṃ(m), sṛjyate sṛjati prabhuḥ .

trāyate trāti viśvātmā, hriyate haratīśvaraḥ .. 6..

तस्मान्न ह्यात्मनोऽन्यस्मा- दन्यो भावो निरूपितः ।

निरूपितेयं(न्) त्रिविधा, निर्मूला भातिरात्मनि ।

इदं(ङ्) गुणमयं(वँ) विद्धि, त्रिविधं(म्) मायया कृतम् ॥ 7॥

tasmānna hyātmano'nyasmā- danyo bhāvo nirūpitaḥ .

nirūpiteyaṃ(n) trividhā, nirmūlā bhātirātmani .

idaṃ(ṅ) guṇamayaṃ(ṽ) viddhi, trividhaṃ(m) māyayā kṛtam .. 7..

एतद् विद्वान् मदुदितं(ञ्), ज्ञानविज्ञाननैपुणम् ।

न निन्दति न च स्तौति, लोके चरति सूर्यवत् ॥ 8॥

etad vidvān maduditaṃ(ñ), jñānavijñānanaipuṇam .

na nindati na ca stauti, loke carati sūryavat .. 8..

प्रत्यक्षेणानुमानेन, निगमेनात्मसं(वँ)विदा ।

आद्यन्तवदसज्ज्ञात्वा, निः(स्)सं(ङ्)गो विचरेदिह ॥ 9॥

pratyakṣeṇānumānena, nigamenātmasaṃ(ṽ)vidā .

ādyantavadasajjñātvā, niḥ(s)saṃ(ṅ)go vicarediha .. 9..

उद्धव उवाच

नैवात्मनो न देहस्य, सं(म्)सृतिर्द्रष्टृदृश्ययोः।

अनात्मस्वदृशोरीश, कस्य स्यादुपलभ्यते ॥ 10॥

uddhava uvāca

naivātmano na dehasya, saṃ(m)sṛtirdraṣṭṛdṛśyayoḥ .

anātmasvadṛśorīśa, kasya syādupalabhyate .. 10..

आत्माव्ययोऽगुणः(श्) शुद्धः(स्), स्वयं(ञ्)ज्योतिरनावृतः ।

अग्निवद्दारुवदचिद्- देहः(ख्) कस्येह सं(म्)सृतिः ॥ 11॥

ātmāvyayo'guṇaḥ(ś) śuddhaḥ(s), svayaṃ(ñ)jyotiranāvṛtaḥ .

agnivaddāruvadacid- dehaḥ(kh) kasyeha saṃ(m)sṛtiḥ .. 11..

श्रीभगवानुवाच

यावद् देहेन्द्रियप्राणै- रात्मनः सन्निकर्षणम् ।

सं(म्)सारः(फ्) फलवां(म्)स्ताव- दपार्थोऽप्यविवेकिनः ॥ 12॥

śrībhagavānuvāca

yāvad dehendriyaprāṇai- rātmanaḥ sannikarṣaṇam .

saṃ(m)sāraḥ(ph) phalavāṃ(m)stave- dapārtho'pyavivekinaḥ .. 12..

अर्थे ह्यविद्यमानेऽपि, सं(म्)सृतिर्न निवर्तते ।

ध्यायतो विषयानस्य, स्वप्नेऽनर्थागमो यथा ॥ 13॥

arthe hyavidyamāne'pi, saṃ(m)sṛtirna nivartate .

dhyāyato viṣayānasya, svapne'narthāgamo yathā .. 13..

यथा ह्यप्रतिबुद्धस्य, प्रस्वापो बह्वनर्थभृत् ।

स एवं प्रतिबुद्धस्य, न वै मोहाय कल्पते ॥ 14॥

yathā hyapratibuddhasya, prasvāpo bahvanarthabhṛt .

sa eva pratibuddhasya, na vai mohāya kalpate .. 14..

शोकहर्षभयक्रोध- लोभमोहस्पृहादयः।

अहं(ङ्)कारस्य दृश्यन्ते, जन्म मृत्युश्च नात्मनः ॥ 15॥

śokaharṣabhayakrodha- lobhamohaspṛhādayaḥ .

ahaṃ(ṅ)kārasya dṛśyante, janma mṛtyuśca nātmanaḥ .. 15..

देहेन्द्रियप्राणमनोऽभिमानो,

जीवोऽन्तरात्मा गुणकर्ममूर्तिः ।

सूत्रं(म्) महानित्युरुधेव गीतः(स्),

सं(म्)सार आधावति कालतन्त्रः ॥ 16॥

dehendriyaprāṇamano'bhimāno

jīvo'ntarātmā guṇakarmamūrtiḥ.

sūtraṃ(m) mahānityurudheva gītaḥ(s)

saṃ(m)sāra ādhāvati kālatantraḥ .. 16..

अमूलमेतद् बहुरूपरूपितं(म्),

मनोवचः(फ्)प्राणशरीरकर्म ।

ज्ञानासिनोपासनया शितेनच्-

छित्त्वा मुनिर्गां(वँ) विचरत्यतृष्णः ॥ 17॥

amūlametadbahurūparūpitaṃ(m)

manovacaḥ(ph)prāṇaśarīrakarma .

jñānāsinopāsanayā śitenac-

chittvā munirgāṃ(v̐) vicaratyatṛṣṇaḥ .. 17..

ज्ञानं(वँ) विवेको निगमस्तपश्च,

प्रत्यक्षमैतिह्यमथानुमानम् ।

आद्यन्तयोरस्य यदेव केवलं(ङ्),

कालश्च हेतुश्च तदेव मध्ये ॥ 18॥

jñānaṃ(v̐) viveko nigamastapaśca

pratyakṣamaitihyamathānumānam .

ādyantayorasya yadeva kevalaṃ(ṅ)

kālaśca hetuśca tadeva madhye .. 18..

यथा हिरण्यं(म्) स्वकृतं(म्) पुरस्तात्,

पश्चाच्च सर्वस्य हिरण्मयस्य ।

तदेव मध्ये व्यवहार्यमाणं(न्),

नानापदेशैरहमस्य तद्वत् ॥ 19॥

yathā hiraṇyaṃ(m) svakṛtaṃ(m) purastāt

paścācca sarvasya hiraṇmayasya .

tadeva madhye vyavahāryamāṇaṃ(n)

nānāpadeśairahamasya tadvat .. 19..

विज्ञानमेतत्त्रियवस्थमं(ङ्)ग,

गुणत्रयं(ङ्) कारणकार्यकर्तृ ।

समन्वयेन व्यतिरेकतश्च,

येनैव तुर्येण तदेव सत्यम् ॥ 20॥

vijñānametattriyavasthamaṃ(ṅ)ga

guṇatrayaṃ(ṅ) kāraṇakāryakartṛ .

samanvayena vyatirekataśca

yenaiva turyeṇa tadeva satyam .. 20..

न यत् पुरस्तादुत यन्न पश्चान्-

मध्ये च तन्न व्यपदेशमात्रम् ।

भूतं(म्) प्रसिद्धं(ञ्) च परेण यद् यत्,

तदेव तत् स्यादिति मे मनीषा ॥ 21॥

na yat purastāduta yanna paścān

madhye ca tanna vyapadeśamātram .

bhūtaṃ(m) prasiddhaṃ(ñ) ca pareṇa yad yat-

tadeva tat syāditi me manīṣā .. 21..

अविद्यमानोऽप्यवभासते यो,

वैकारिको राजससर्ग एषः ।

ब्रह्म स्वयं(ञ्)ज्योतिरतो विभाति,

ब्रह्मेन्द्रियार्थात्मविकारचित्रम् ॥ 22॥

avidyamāno'pyavabhāsate yo

vaikāriko rājasasarga eṣaḥ .

brahma* svayaṃ(ñ)jyotirato vibhāti*

brahmendriyārthātmavikāraci*tram .. 22..

एवं(म्) स्फुटं(म्) ब्रह्मविवेकहेतुभिः(फ्),

परापवादेन विशारदेन ।

छित्त्वाऽऽत्मस*न्देहमुपारमेत*,

स्वान*न्दतु*ष्टोऽखिलकामुकेभ्यः ॥ 23॥

evaṃ(m) sphuṭaṃ(m) brahmavivekahetubhiḥ(ph)

parāpavādena viśāradena .

chittvā''tmasa*ndehamupārameta*

svāna*ndatu*ṣṭo'khilakāmukebhyaḥ .. 23..

नात्मा वपुः(फ्) पार्थिवमिन्द्रियाणि,

देवा ह्यसुर्वायुर्जलं(म्) हुताशः ।

मनोऽन्नमात्रं(न्) धिषणा च सत्त्व-

महं(ङ्)कृतिः(ख्) खं(ङ्) क्षितिरर्थसाम्यम् ॥ 24॥

nātmā vapuḥ(ph) pārthivamindriyāṇi

devā hyasurvāyurjalaṃ(m) hutāśaḥ .

mano'nnamātraṃ(n) dhiṣaṇā ca sattva-

mahaṃ(ṅ)kṛtiḥ(kh) khaṃ(ṅ) kṣitirarthasāmyam .. 24..

समाहितैः(ख्) कः(ख्) करणैर्गुणात्मभिर्-

गुणो भवेन्मत्सुविविक्तधाम्नः ।
विक्षिप्यमाणैरुत किं(न्) नु दूषणं(ङ्),
घनैरुपेतैर्विगतै रवेः(ख्) किम् ॥ 25 ॥

samāhitaiḥ(kh) kaḥ(kh) karaṇairguṇātmabhir-
guṇo bhavenmatsuviviktadhāmnaḥ .
vikṣipyamāṇairuta kiṃ(n) nu dūṣaṇaṃ(ṅ)
ghanairupetairvigatai raveḥ(kh) kim .. 25..

यथा नभो वाय्वनलाम्बुभूगुणैर्-
गतागतैर्वर्तुगुणैर्न सज्जते ।
तथाक्षरं(म्) सत्त्वरजस्तमोमलै-
रहं(म्)मतेः(स्) सं(म्)सृतिहेतुभिः(फ्) परम् ॥ 26 ॥

yathā nabho vāyvanalāmbubhūguṇair-
gatāgatairvartuguṇairna sajjate .
tathākṣaraṃ(m) sattvarajastamomalai-
rahaṃ(m)mateḥ(s) saṃ(m)sṛtihetubhiḥ(ph) param .. 26..

तथापि सं(ङ्)गः(फ्) परिवर्जनीयो,
गुणेषु मायारचितेषु तावत् ।
मद्भक्तियोगेन दृढेन यावद्,
रजो निरस्येत मनः(ख्)कषायः ॥ 27 ॥

tathāpi saṃ(ṅ)gaḥ(ph) parivarjanīyo
guṇeṣu māyāraciteṣu tāvat .

madbhaktiyogena dṛḍhena yāvad-

rajo nirasyeta manaḥ(kh) kaṣāyaḥ .. 27..

यथाऽऽमयोऽसाधुचिकित्सितो नृणां(म्),

पुनः(फ्) पुनः(स्) सं(न्)तुदति प्ररोहन् ।

एवं(म्) मनोऽपक्वकषायकर्म,

कुयोगिनं(वँ) विध्यति सर्वसं(ङ्)गम् ॥ 28॥

yathā''mayo'sādhucikitsito nṛṇāṃ(m)

punaḥ(ph) punaḥ(s) saṃ(n)tudati prarohan .

evaṃ(m) mano'pakvakaṣāyakarma

kuyoginaṃ(ṽ) vidhyati sarvasaṃ(ṅ)gam .. 28..

कुयोगिनो ये विहितान्तरायैर्-

मनुष्यभूतैस्त्रिदशोपसृष्टैः।

ते प्राक्तनाभ्यासबलेन भूयो,

युञ्जन्ति योगं(न्) न तु कर्मतन्त्रम् ॥ 29॥

kuyogino ye vihitāntarāyair-

manuṣyabhūtaistridaśopasṛṣṭaiḥ .

te prāktanābhyāsabalena bhūyo

yuñjanti yogaṃ(n) na tu karmatantram .. 29..

करोति कर्म क्रियते च जन्तुः(ख्),

केनाप्यसौ चोदित आनिपातात् ।

न तत्र विद्वान् प्रकृतौ स्थितोऽपि
निवृत्ततृष्णः(स्) स्वसुखानुभूत्या ॥ 30॥
karoti karma kriyate ca jantuḥ(kh)
kenāpyasau codita ānipatāt .
na tatra vidvān prakṛtau sthito'pi
nivṛttatṛṣṇaḥ(s) svasukhānubhūtyā .. 30..

तिष्ठन्तमासीनमुत व्रजन्तं(म्),
शयानमुक्षन्तमदन्तमन्नम् ।
स्वभावमन्यत् किमपीहमान-
मात्मानमात्मस्थमतिर्न वेद ॥ 31॥
tiṣṭhantamāsīnamuta vrajantaṃ(m)
śayānamukṣantamadantamannam .
svabhāvamanyatkimapīhamāna-
mātmānamātmasthamatirna veda .. 31..

यदि स्म पश्यत्यसदिन्द्रियार्थं(न्),
नानानुमानेन विरुद्धमन्यत् ।
न मन्यते वस्तुतया मनीषी
स्वाप्नं(यँ) यथोत्थाय तिरोदधानम् ॥ 32॥
yadi sma paśyatyasadindriyārthaṃ(n)
nānānumānena viruddhamanyat .
na manyate vastutayā manīṣī

svāpnaṃ(ỹ) yathotthāya tirodadhānam .. 32..

पूर्वं(ङ्) गृहीतं(ङ्) गुणकर्मचित्र-
मज्ञानमात्मन्यविविक्तमं(ङ्)ग।
निवर्तते तत् पुनरीक्षयैव
न गृह्यते नापि विसृज्य आत्मा ॥ 33॥

pūrvaṃ(ṅ) gṛhītaṃ(ṅ) guṇakarmacitra-
majñānamātmanyaviviktamaṃ(ṅ)ga .
nivartate tat punarīkṣayaiva
na gṛhyate nāpi visṛjya ātmā .. 33..

यथा हि भानोरुदयो नृचक्षुषां(न्),
तमो निहन्यान्न तु सद् विधत्ते ।
एवं(म्) समीक्षा निपुणा सती मे,
हन्यात्तमिस्रं(म्) पुरुषस्य बुद्धेः ॥ 34॥

yathā hi bhānorudayo nṛcakṣuṣāṃ(n)
tamo nihanyānna tu sad vidhatte .
evaṃ(m) samīkṣā nipuṇā satī me
hanyāttamisraṃ(m) puruṣasya buddheḥ .. 34..

एष स्वयं(ञ्)ज्योतिरजोऽप्रमेयो,
महानुभूतिः(स्) सकलानुभूतिः ।
एकोऽद्वितीयो वचसां(वँ्) विरामे,
येनेषिता वागसवश्चरन्ति ॥ 35॥

eṣ*ā svayaṃ(ñ)jyotirajo'prameyo

mahānubhūtiḥ(s) sakalānubhūtiḥ .

eko'dvitīyo vacasāṃ(v̐) virāme

yeneṣitā vāgasav*āśc*aranti .. 35..

एतावानात्मस*म्मोहो, यद् विक*ल्प*स्तु केवले ।

आत्मन्नृते स्वमात्मान- मवल*म्बो न य*स्य हि ॥ 36॥

Etāvānātmas*ammoho, yadvik*alp*astu kevale .

ātmannṛte svamātmāna- maval*ambo na y*asya hi .. 36..

यन्नामाकृतिभिर्ग्राह्यं(म्), पं(ञ्)चवर्णमबाधितम्।

व्यर्थेनाप्यर्थवादोऽयं(न्), द्वयं(म्) प*ण्डितमानिनाम् ॥ 37॥

yannāmākṛtibhirgrāhyaṃ(m), paṃ(ñ)cavarṇamabādhitam .

vyarthenāpyarthavādo'yaṃ(n), dvayaṃ(m) p*aṇḍitamāninām .. 37..

योगिनोऽपक्वयोग*स्य, युं(ञ्)जतः(ख्) काय उ*त्थितैः ।

उपसर्गैर्विह*न्येत, त*त्रायं(वँ) विहितो विधिः ॥ 38॥

yogino'pakvayog*asya, yuṃ(ñ)jataḥ(kh) kāya u*tthitaiḥ .

upasargairvih*anyeta, t*atrāyaṃ(v̐) vihito vidhiḥ .. 38..

योगधारणया कां(म्), श्चिदासनैर्धारणान्वितैः।

तपोमन्त्रौषधैः(ख्) कां(म्), श्चिदुपसर्गान् विनिर्दहेत् ॥ 39॥

yogadhāraṇayā kāṃ(m), ścidāsanairdhāraṇānvitaiḥ .

tapomantrauṣadhaiḥ(kh) kāṃ(m), ścidupasargān vinirdahet .. 39..

कां(म्)श्चिन्ममानुध्यानेन, नामसं(ङ्)कीर्तनादिभिः ।

योगेश्वरानुवृत्त्या वा, हन्यादशुभदाञ्छनैः ॥ 40 ॥

kāṃ(m)ścinmamānudhyānena, nāmasaṃ(ṅ)kīrtanādibhiḥ .

yogeśvarānuvṛttyā vā, hanyādaśubhadānśanaiḥ .. 40..

केचिद् देहमिमं(न्) धीराः(स्), सुकल्पं(वँ) वयसि स्थिरम् ।

विधाय विविधोपायै- रथ युं(ञ्)जन्ति सिद्धये ॥ 41 ॥

kecid dehamimaṃ(n) dhīrāḥ(s), sukalpaṃ(v̐) vayasi sthiram .

vidhāya vividhopāyai- ratha yuṃ(ñ)janti siddhaye .. 41..

न हि तत्कुशलादृत्यं(न्), तदायासो ह्यपार्थकः ।

अन्तवत्त्वाच्छरीरस्य, फलस्येव वनस्पतेः ॥ 42 ॥

na hi tatkuśalādṛtyaṃ(n), tadāyāso hyapārthakaḥ .

antavattvāccharīrasya, phalasyeva vanaspateḥ .. 42..

योगं(न्) निषेवतो नित्यं(ङ्), कायश्चेत्कल्पतामियात् ।

तच्छ्रद्दध्यान्न मतिमान्, योगमुत्सृज्य मत्परः ॥ 43 ॥

yogaṃ(n) niṣevato nityaṃ(ṅ), kāyaścetkalpatāmiyāt .

tacchraddadhyānna matimān, yogamutsṛjya matparaḥ .. 43..

योगचर्यामिमां(यँ) योगी, विचरन् मदपाश्रयः ।
नान्तरायैर्विहन्येत, निः(स्)स्पृहः(स्) स्वसुखानुभूः ॥ 44॥

yogacaryāmimāṃ(ỹ) yogi, vicaran madapāśrayaḥ .
nāntarāyairvihanyeta, niḥ(s)spṛhaḥ(s) svasukhānubhūḥ .. 44..

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)
सं(म्)हितायामेकादशस्कन्धेऽष्टाविं(म्)शोऽध्यायः॥

iti śrīmadbhāgavate mahāpurāṇe pāramahaṃ(m)syāṃ(m)
saṃ(m)hitāyāmekādaśaskandhe'ṣṭāviṃ(m)śo'dhyāyaḥ .. 28..

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः ॥

Om Pūrṇamadah(ph) Pūrṇamidaṃ(m) PūrṇātPūrṇamudacyate|
Pūrṇasya Pūrṇamādāya Pūrṇamevāvashiṣyate ||
Om Shāntih(ś) Shāntih(ś) Shāntih ||

